सप्तमः पाठः

# ज्ञानं भारः क्रियां विना

[पञ्चतन्त्रनामकस्य संस्कृतनीतिकथाग्रन्थस्य अन्तिमे तन्त्रे विद्यमानायाः कथायाः सम्पादितः अंशोऽयं पाठः। अस्यां कथायां व्यवहारं विना शुष्कस्य ज्ञानस्य निरर्थकता दर्शिता। उक्तं च– 'शास्त्राण्यधीत्यापि भवन्ति मूर्खाः, यस्तु क्रियावान् पुरुषः स विद्वान्।' अत्रोपदेशो लभ्यते यत् व्यवहारो बुद्धिः क्रिया वा ज्ञानस्य परिणामः भवति। व्यवहारं विना तु पाण्डित्यं व्यर्थं भारभूतं च।]

**वरं बुद्धिर्न सा विद्या विद्याया बुद्धिरुत्तमा ।**
**बुद्धिहीना विनश्यन्ति यथा ते सिंहकारकाः ॥**

एकस्मिन् नगरे चत्वारः युवानः परस्परं मित्रभावेन निवसन्ति स्म। तेषां त्रयः शास्त्रपारंगताः, परन्तु बुद्धिरहिताः। एकस्तु बुद्धिमान् केवलं शास्त्रपराङ्मुखः। अथ तैः कदाचिन्मित्रैर्मन्त्रितम्– 'को गुणो विद्यायाः येन देशान्तरं गत्वा भूपतीन् परितोष्य अर्थोपार्जना न क्रियते? तत्पूर्वदेशं गच्छामः।' तथानुष्ठिते किञ्चिन्मार्गं गत्वा तेषां ज्येष्ठतरः प्राह– 'अहो! अस्माकमेकश्चतुर्थो मूढः केवलं बुद्धिमान्। न च राजप्रतिग्रहो बुद्ध्या लभ्यते विद्यां विना। तन्नास्मै स्वोपार्जितं दास्यामः। तद्गच्छतु गृहम्।' ततो द्वितीयेनाभिहितम्– 'भोः सुबुद्धे! गच्छ त्वं स्वगृहम्, यतस्ते विद्या नास्ति।'

ततस्तृतीयेनाभिहितम्– 'अहो, न युज्यते एवं कर्तुम्। यतो वयं बाल्यात्प्रभृत्येकत्र क्रीडिताः। तदागच्छतु महानुभावोऽस्मदुपर्जितवित्तस्य समभागी भविष्यतीति। उक्तञ्च–

**अयं निजः परो वेति गणना लघुचेतसाम्।**
**उदारचरितानान्तु वसुधैव कुटुम्बकम्॥**

तदागच्छतु एषोऽपि इति। तथानुष्ठिते तैः मार्गाश्रितैरटव्यां कतिचिदस्थीनि दृष्टानि। ततश्चैकेनाभिहित्तम्– 'अहो! अद्य विद्यापरीक्षा क्रियते। कतिचिदेतानि मृतसत्त्वस्यास्थीनि तिष्ठन्ति। तद्विद्याप्रभावेण जीवनसहितानि कुर्मः। अहमस्थिसञ्चयं करोमि। ततश्च तेनौत्सुक्यात् अस्थिसञ्चयः

कृत:। द्वितीयेन चर्ममांसरुधिरं संयोजितम्। तृतीयोऽपि यावज्जीवनं सञ्चारयति तावत्सुबुद्धिना वारित:– 'भो: तिष्ठतु भवान्, एष सिंहो निष्पाद्यते। यद्येनं सजीवं करिष्यसि तत: सर्वानपि व्यापादयिष्यति, इति तेनाभिहित: स आह– 'धिङ मूर्ख! नाहं विद्याया विफलतां करोमि।' ततस्तेनाभिहितम्– 'तर्हि प्रतीक्षस्व क्षणं यावदहं वृक्षमारोहामि।' तथानुष्ठिते यावत् सजीव: कृतस्तावत्ते त्रयोऽपि सिंहेनोत्थाय व्यापादिता:। स च पुनर्वृक्षादवतीर्य गृहं गत:। अत: उच्यते–

**अवशेन्द्रियचित्तानां हस्तिस्नानमिव क्रिया ।**
**दुर्भगाभरणप्रायो ज्ञानं भार: क्रियां विना ॥**

## शब्दार्था:

| | | |
|---|---|---|
| **पारंगता:** | निष्णाता: | निपुण |
| **बुद्धिरहिता:** | व्यवहारज्ञानशून्या: | व्यावहारिक ज्ञान न रखने वाला |
| **शास्त्रपराङ्मुख:** | अनधीतशास्त्र: | शास्त्रों के अध्ययन से रहित |
| **देशान्तरम्** | अन्य: देश: | अन्य देश |
| **अर्थोपार्जना** | धनलाभ: | धन की प्राप्ति |
| **राजप्रतिग्रह:** | राजानुग्रह: | राजा से प्राप्त धन आदि |
| **अभिहितम्** | कथितम् | कहा |
| **वित्तस्य** | धनस्य | धन का |
| **समभागी** | समानलाभयुक्त: | समान लाभ पाने वाला |
| **लघुचेतसाम्** | क्षुद्रचित्तानाम् | नीच बुद्धि वालों का |
| **कुटुम्बकम्** | परिवार: | परिवार |
| **सत्त्वस्य** | जीवस्य | जीव का |
| **रुधिरम्** | रक्तम् | रक्त, खून |
| **संयोजितम्** | समाहरणं कृतम् | इकट्ठा किया |
| **प्रतीक्षस्व** | प्रतीक्षां कुरु | प्रतीक्षा करो |
| **वारित:** | न करणाय प्रेरित: | रोका गया |

| | | |
|---|---|---|
| **निष्पाद्यते** | निर्मित: भवति | बन जाता है |
| **व्यापादयिष्यति** | मारयिष्यति | मार देगा |
| **अवशेन्द्रियचित्तानाम्** | येषाम् इन्द्रियाणि चित्तं च स्ववशे न सन्ति | जिनके इन्द्रिय और मन अपने वश में नहीं |
| **दुर्भगाभरणप्राय:** | कुरूपस्य अनेकाभूषणै: अलंकरणम् | असुन्दर को अलंकारों से लादना |
| **अटव्याम्** **( अटवी + सप्तमी )** | वने, अरण्ये | वन में |

## व्याकरणम्

### ( क ) सन्धिविच्छेद–

| | | |
|---|---|---|
| **बुद्धिर्न** | – | बुद्धि + न |
| **बुद्धिरुत्तमा** | – | बुद्धि: + उत्तमा |
| **एकस्तु** | – | एक: + तु |
| **कदाचिन्मित्रैर्मन्त्रितम्** | – | कदाचित् + मित्रै: + मन्त्रितम् |
| **अर्थोपार्जना** | – | अर्थ + उपार्जना |
| **तथानुष्ठिते** | – | तथा + अनुष्ठिते |
| **किञ्चिन्मार्गम्** | – | किम् + चित् + मार्गम् |
| **अस्माकमेकश्चतुर्थ:** | – | अस्माकम् + एक: + चतुर्थ: |
| **तन्नास्मै** | – | तत् + न + अस्मै |
| **स्वोपार्जितम्** | – | स्व + उपाजितम् |
| **ततस्तृतीयेनाभिहित्तम्** | – | तत: + तृतीयेन + अभिहितम् |
| **बाल्यात्प्रभृत्येकत्र** | – | बाल्यात् + प्रभृति + एकत्र |
| **महानुभावोऽस्मदुपार्जितवित्तस्य** | – | महानुभाव: + अस्मत् + उपार्जितवित्तस्य |
| **उदारचरितानान्तु** | – | उदारचरितानाम् + तु |
| **एषोऽपि** | – | एष: + अपि |

| | | |
|---|---|---|
| **मार्गाश्रितैरटव्याम्** | – | मार्ग + आश्रितैः + अटव्याम् |
| **कतिचिदस्थीनि** | – | कतिचित् + अस्थीनि |
| **ततश्चैकेनाभिहितम्** | – | ततः + च + एकेन + अभिहितम् |
| **कतिचिदेतानि** | – | कतिचित् + एतानि |
| **तेनौत्सुक्यात्** | – | तेन + औत्सुक्यात् |
| **यावज्जीवनम्** | – | यावत् + जीवनम् |
| **यद्येनम्** | – | यदि + एनम् |
| **कृतस्तावत्ते** | – | कृतः + तावत् + ते |
| **सिंहेनोत्थाय** | – | सिंहेन + उत्थाय |
| **पुनर्वृक्षादवतीर्य** | – | पुनः + वृक्षात् + अवतीर्य |

**( ख ) समासविग्रहः**

| | | |
|---|---|---|
| **बुद्धिहीनाः** | – | बुद्ध्या हीनाः (तृतीया तत्पु०) |
| **शास्त्रपारंगताः** | – | शास्त्रेषु पारंगता (सप्तमी तत्पु०) |
| **बुद्धिरहिताः** | – | बुद्ध्या रहिताः (तृतीया तत्पु०) |
| **शास्त्रपराङ्मुखः** | – | शास्त्रेभ्यः पराङ्मुखः (पञ्चमी तत्पु०) |
| **देशान्तरम्** | – | अन्यः देशः (कर्मधारय) |
| **अर्थोपार्जना** | – | अर्थस्य उपार्जना (षष्ठी तत्पु०) |
| **महानुभावः** | – | महान् चासौ अनुभावः (कर्मधारय) |
| **लघुचेतसाम्** | – | लघु चेतो येषां ते (बहुव्रीहि) तेषाम् |
| **उदारचरितानाम्** | – | उदारं चरितं येषां ते (बहुव्रीहि) तेषाम् |
| **मार्गाश्रितैः** | – | मार्गम् आश्रितः (द्वितीयाः तत्पु०) तैः |
| **अस्थिसञ्चयः** | – | अस्थीनां सञ्चयः (षष्ठी तत्पु०) |
| **चर्ममांसरुधिरम्** | – | चर्म च मांसं च रुधिरं च तेषां समाहारः (द्वन्द्वः) |

**अवशेन्द्रियचित्तानाम्** – न वशे सन्ति इन्द्रियाणि चित्तं च येषाम् (ब०व्री०)

**दुर्भगाभरणम्** – दुर्भगानाम् आभरणम् (षष्ठी तत्पु०)

**सजीवः** – जीवनेन सह वर्तमानः (सहार्थ बहुव्रीहि)

## (ग) व्युत्पत्तिः (प्रकृतिप्रत्ययविभागः)

**परितोष्य** – परि + Öतुष् + णिच् + ल्यप्

**कर्तुम्** – Öकृ + तुमुन्

**मूढः** – Öमुह् + क्त

**एकत्र** – एक + त्रल् (तद्धित)

**व्यापादितः** – वि + आ + Öपद् + णिच् + क्त

**अवतीर्य** – अव + Öतृ + ल्यप्

**अभिहितम्** – अभि + Öधा + क्त

**अनुष्ठितः** – अनु + Öस्था + क्त

**उपार्जितः** – उप + Öअर्ज् + क्त

**आश्रितः** – आ + Öश्रि + क्त

## अभ्यासः (लिखितः)

**1. अधोलिखितानां प्रश्नानाम् उत्तरम् एकपदेन वदत–**

(क) तेषां त्रयः केन व्यापादिताः?

(ख) तेषां त्रयः शास्त्रपारंगताः किन्तु कीदृशाः आसन्?

(ग) प्रथमः युवकः किम् अकरोत्?

(घ) चर्ममांसरुधिरं केन संयोजितम्?

(ङ) चतुर्थः वृक्षादवतीर्य कुत्र गतः?

**2. अधोलिखितानां प्रश्नानाम् उत्तरम् एकवाक्येन वदत–**

(क) अयं निज: पर: वा इति कस्य गणना भवति?

(ख) विद्याया: का उत्तमा?

(ग) त्रयोऽपि केन व्यापादिता:?

(घ) मार्गाश्रितै: तै: अटव्यां कानि दृष्टानि?

(ङ) किं सिंह: वन्यपशु: अस्ति?

## अभ्यास: (मौखिक:)

**1. सन्धिविच्छेदं कुरुत–**

एकस्तु, मित्रैर्मन्त्रितम्, भविष्यतीति, मार्गाश्रितै:, ततश्च, यावज्जीवनम् ।

**2. समासविग्रहं कुरुत–**

बुद्धिहीना:, देशान्तरम्, अर्थोपार्जना, उदारचरित:, अस्थिसञ्चय:, सजीव:

**3. प्रकृतिप्रत्ययविभागं कुरुत–**

मूढ:, कर्त्तुम्, अवतीर्य, एकत्र, अभिहितम्, आश्रित:।

**4. संस्कृतभाषया अनुवादं कुरुत–**

(क) किसी गाँव में चार युवक रहते थे।

(ख) वे परस्पर मित्रभाव से रहते थे।

(ग) अर्थोपार्जन के लिए वे दूसरे देश में गये।

(घ) उन्होंने एक स्थान पर अस्थियाँ देखीं।

(ङ) वे अस्थियाँ एक सिंह की थीं।

ÿ. **अधोलिखितेषु कोष्ठपदेन समुचितेन रिक्तस्थानं पूरयत–**

(क) कदाचित् तैः ..................... मन्त्रितम्। (**विप्रैः/ साधुभिः/ मित्रैः**)

(ख) राजपरिग्रहः ..................... विना न लभ्यते। (**धनं/ बुद्धिं/ विद्यां**)

(ग) ..................... चरितानां तु वसुधैव कुटुम्बकम्। (**उदार/ विशाल**)

(घ) त्रयोऽपि ..................... व्यापादिताः। (**दस्युना/ सिंहेन**)

(ङ) तृतीयः पुरुषः सुबुद्धिना .....................। (**वारितः/ प्रेरितः**)

## योग्यता-विस्तारः

इस पाठ के अंत में एक पद्य है जिसमें ज्ञान और व्यवहार का सम्बन्ध दिखाया गया है। हाथी के स्नान का दृष्टांत है कि उसे अच्छी तरह कोई नहला भी दे तो वह पुनः धूल में लोट जाता है या सिर पर धूल अपनी सूँड़ से फेंकता है। स्नान उसके लिए व्यर्थ हो जाता है। जिन लोगों के मन और इन्द्रिय वश में नहीं रहते, हाथी के समान जो मनमाना करते हैं, उन्हें ज्ञान मिलना व्यर्थ है। उसका उपयोग वे नीचता दिखाने में ही करेंगे। ऐसे लोगों का ज्ञान वैसा ही है जैसे किसी कुरूप पर अलंकारों का बोझ लाद दें। उसका रूप तो नहीं बदलेगा, अलंकार उसके लिए भार-रूप रहेंगे।

'क्रिया' शब्द के अनेक अर्थ हैं–

(1) व्याकरण में–जाना, खाना आदि।

(2) व्यवहार

(3) विद्या

(4) कार्य

(5) संस्कार इत्यादि।